छित्त्वा शिखां करे कृत्वा घृतमध्ये नियोजयेत्॥
ब्रह्मपुत्त्रि शिखे त्वं हि वाणीरूपा सनातनी।
दीयते पावके स्थानं गच्छ देवि नमोऽस्तु ते॥
कामं मायां कूर्च्चमन्त्रं वह्निजायामुदीरयेत्।
शिखामाश्रित्य पितरो देवो देवर्षयस्तथा।
सर्व्वाश्चाश्रमकर्म्माणि निवसन्ति शिखोपरि॥
ततः सन्तर्प्य ताः सर्व्वाः देवर्षिपितृदेवताः;
शिखासूत्रपरित्यागात् देही ब्रह्ममयो भवेत्॥
यज्ञसूत्रशिखात्यागात् सन्न्यासः स्याद्द्विजन्मनाम्।
शूद्राणामितरेषाञ्च शिखां हुत्वैव संस्क्रिया॥
ततो मुक्तशिखासूत्रः प्रणमेद्दण्डवद्गुरुम्।
गुरुरुत्थाप्य तं शिष्यं दक्षकर्णे वदेदिमम्॥
तत्त्वमसि महाप्राज्ञ हंसः सोऽहं विभावय।
निर्म्ममो निरहङ्कारः स्वभावेन सुखं चर॥
ततो घटञ्च वह्निञ्च विसृज्य ब्रह्मतत्त्ववित्।
आत्मस्वरूपं तं मत्वा प्रणमेच्छिरसा गुरुम्॥
नमस्तुभ्यं नमो मह्यं तुभ्यं मह्यं नमो नमः।
त्वमेव त्वदहमेव विश्वरूपं नमोऽस्तु ते॥
ब्रह्ममन्त्रोपासकानां तत्त्वज्ञानां जितात्मनाम्।
स्वमन्त्रेण शिखाच्छेदात् सन्न्यासग्रहणं भवेत्॥
ब्रह्मज्ञानविशुद्धानां किं यज्ञैः श्राद्धपूजनैः।
स्वेच्छाचारपराणान्तु प्रत्यवायो न विद्यते॥
ततो निर्द्वन्द्वरूपोऽसौ निष्कामः स्थिरमानसः।
निर्म्ममो विहरेत् शिष्यः साक्षाद्ब्रह्ममयो भुवि॥
मुक्तो विधिनिषेधाभ्यां निर्योगक्षेम आत्मवित्।
सुखदुःखसमो धीरो जितात्मा विगतस्पृहः॥
स्थिरात्मा प्राप्तदुःखोऽपि सुखे प्राप्तेऽपि निष्पृहः
सदानन्दः शुचिः शान्तो निरपेक्षो निराकुलः॥
नोद्वेजकः स्याज्जीवानां सदा प्राणिहिते रतः।
विगतामर्षभीर्दान्तो निःसङ्कल्पो निरुद्यमः॥
शोकद्वेषविमुक्तः स्याच्छत्रौ मित्रे समो भवेत्।
शीतवातातपसहः समो मानापमानयोः॥
समः शुभाशुभे तुष्टो यदृच्छालाभवस्तुना।
निस्त्रैगुण्यो निर्व्विकल्पो निर्लोभः स्यादसञ्चयी
यथासत्यनुपाश्रित्य मृषा विश्वं प्रतिष्ठते।
आत्माश्रितस्तथा देहो जानन्नेवं सुखी भवेत्॥
इन्द्रियाण्येव कुर्व्वन्ति स्वं स्वं कर्म्म पृथक् पृथक्
आत्मा साक्षी विनिर्लिप्तो ज्ञात्वैवं मोक्षभाग्‌ भवेत्॥
धातुप्रतिग्रहं निन्दामनृतं क्रीड़नं स्त्रिया।
रेतस्त्यागमसूयाञ्च सन्न्यासी परिवर्ज्जयेत्॥
सर्व्वत्र समदृष्टिः स्यात् कीटे देवे तथा नरे।
सर्व्वं ब्रह्मेति जानीयात् परिव्राट् सर्व्वकर्म्मसु॥
विप्रान्नं श्वपचान्नं वा यस्मात्तस्मात् समागतम्
देशं कालं तथा चान्नमश्नीयादविचारयन्।
अध्यात्मशास्त्राध्ययनैः सदा तत्त्वविचारणैः॥
अवधूतो नयेत् कालं स्वेच्छाचारपरायणः।
सन्न्यासिनां मृतं कायं दाहयेन्न कदाचन॥
संपूज्य गन्धपुष्पाद्यैर्निखनेद्वाप्सु मज्जयेत्।
अप्राप्तयोगमर्त्त्यानां सदा कामाभिलाषिणाम्॥
प्रभावाज्जायते देवि प्रवृत्तिः कर्म्मसंकुले।
अत्रापि ते सानुरक्ता ध्यानार्च्चाजपसाधने॥
श्रेयस्तदेव जानन्तस्तत्रैव दृढ़निश्चयाः।
अतः कर्म्मविधानानि प्रोक्तानि चित्तशुद्धये॥
नामरूपं बहुविधं तदर्थं कल्पितं मया।
ब्रह्मज्ञानं विना देवि कर्म्मसंन्यसनं विना॥
कुर्व्वन् कल्पशतं कर्म्म न भवेन्मुक्तिभाजनः।
कुलावधूतस्तत्त्वज्ञो जीवन्मुक्तो नराकृतिः॥
साक्षान्नारायणं मत्वा गृहस्थस्तं प्रपूजयेत्।
यतेर्द्दर्शनमात्रेण विमुक्तः सर्व्वपातकात्;
तीर्थव्रततपोदानसर्व्वयज्ञफलं लभेत्॥"
इत्यवधूताश्रमः। इति महानिर्व्वाणतन्त्रे अष्टमोल्लासः॥

सप, सम्बन्धे। (भ्वा०-पर०-सक०-सेट्।) असीसपत्। इति दुर्गादासः॥ कविकल्पद्रुमे मूर्द्धन्यादिरयम्॥

सपत्त्राकरणं, क्ली, (सपत्त्र+कृ+ल्युट्। "सपत्त्रनिष्पत्त्रादतिव्यथने।" ५।४।६१। इति डाच्।) अत्यन्तपीड़नम्। इति हलायुधः॥

सपत्त्राकृतः, पुं, (सपत्त्र+कृ+क्तः। डाच्।) क्षतमृगादिः। अत्यन्तपीड़िते, त्रि। इति केचित्॥

सपत्त्राकृतिः, स्त्री, (सपत्त्र+कृ+क्तिन्। डाच्।) अत्यन्तपीड़नम्। तत्पर्य्यायः। निष्पत्त्राकृतिः २। इति हेमचन्द्रः॥

सपत्नः, पुं, (सह पतति एकार्थे इति। पत+नः। सहस्य सः।) शत्रुः। इत्यमरः॥ (यथा, महाभारते। १। १४५। ५।
"संरक्ष तात मन्त्रञ्च सपत्नांश्च ममोद्धर।
निपुणेनाभ्युपायेन यद्ब्रवीमि तथा कुरु॥")

सपत्नारिः, पुं, (सपत्नस्य शत्रोरिरिव दुर्गप्रभवात्वात्।) वंशविशेषः। वेयुड़ वाँश् इति भाषा। यथा,—
"ब्रह्मयष्टिः सपत्नारिर्बहुसन्ततिराशुपः।"
इति शब्दचन्द्रिका॥

सपत्नी, स्त्री, (समानः एकः पतिर्यस्याः। "नित्यं सपत्न्यादिषु।" ४। १। ३५। इति ङीप्। पत्युर्नकारादेशः समानस्य सभावोऽपि निपात्यते।) समानपतिका। सतीन इति भाषा॥ (यथा, आर्य्यासप्तशत्याम्। ४६२।
"या नीयते सपत्न्या प्रविश्य या वर्ज्जिता भुजङ्गेन।
यमुनाया इव तस्याः सखि मलिनं जीवनं मन्ये॥")
यथा च। दौहित्राभावे सपत्नीपुत्त्रः। तस्य पुत्त्रत्वस्मरणात्। यथा मनुः।
"सर्व्वासामेकपत्नीनामेका चेत् पुत्त्रिणी भवेत्।
सर्व्वास्तास्तेन पुत्त्रेण प्राह पुत्त्रवतीर्म्मनुः॥"
एकपत्नीनामिति एकः पतिर्य्यासामिति।
अत्र सपत्नीपुत्त्रस्य पुत्त्रत्वातिदेशात् तत्सत्त्वेऽपि स्त्रीणां सपिण्डनं मैथिलैरुक्तम्। तन्न।
"पुत्त्रेणैव तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्त्रादयोऽपि ये॥"
इति लघुहारीतवचने एवकारेणातिदिष्टपुत्त्रनिषेधात्। इति शुद्धितत्त्वम्॥

सपदि, व्य, (संपद्यते इति। पद गतौ+इन्। पृषोदरादित्वात् मलोपः।) द्रुतम्। तत्क्षणः। इत्यमरः॥ (यथा, कुमारे। ३। ७६।
"सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम्।
सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीत् वेगदीर्घीकृताङ्गः॥")

सपर्य्या, स्त्री, (सपर पूजायाम्+"कण्ड्वादिभ्यो यक्।" ३।१।२७। इति यक्। "अ प्रत्ययात्।" ३। ३। १०२। इति अः। ततष्टाप्।) पूजा। इत्यमरः॥ (यथा, माघे। १। १४।
"तमर्घ्यमर्घ्यादिकयादिपूरुषः
सपर्य्यया साधु स पर्य्यपूपुजत्॥")

सपादः, त्रि, पादेन सह वर्त्तमानः। स तु चरणयुक्तश्चतुर्थभागसहितश्च। यथा,—
"सपादपलमानेन वेला त्रुट्यति निश्चितम्।"
इति सत्कृत्यमुक्तावली॥

सपादपीठं, त्रि, (सपादं पादसहितं पीठं यत्र।) पादपीठयुक्तसिंहासनादि। यथा,—
"आदित्सदादीप्तकृशानुकल्पं
सिंहासनं तस्य सपादपीठम्।
सन्तप्तचामीकरवल्गुवज्र-
विभागविन्यस्तमहार्घरत्नम्॥"
इति भट्टौ ३ सर्गः॥

सपिण्डः, पुं, (समानः पिण्डो मूलपुरुषो निवापो वा यस्य। समानस्य सः।) सप्तपुरुषान्तर्गतज्ञातिः। तत्पर्य्यायः। सनाभिः २। इत्यमरः॥ स च अशौचविवाहदायभेदात् त्रिविधः। तत्राशौचसपिण्डस्य लक्षणं यथा। सप्तपुरुषान्तर्गतत्वे सति गोत्रैक्ये सति दातृत्वभोक्तृत्वान्यतरसम्बन्धेन पिण्डलेपान्यतरवत्त्वम्। दत्तकन्यानान्तु भर्त्तृसापिण्ड्येन सापिण्ड्यम्। अदत्तानां पित्रवधित्रिपुरुषसापिण्ड्यम्। विवाहसपिण्डास्तु। पितृपितृबन्ध्वपेक्षया सप्तमपुरुषावधयः मातामहमातृबन्ध्वपेक्षया पञ्चमपुरुषावधयश्च। यथा,—
"पञ्चमात् सप्तमादूर्द्ध्वं मातृतः पितृतः क्रमात्।
सपिण्डता निवर्त्तेत सर्व्ववर्णेष्वयं विधिः॥"
इत्युद्वाहतत्त्वधृतनारदवचनम्॥
दायसपिण्डास्तु। त्रिपुरुषावधयः। ते च पितृपितामहप्रपितामहाः तेषां पुत्त्रपौत्त्रप्रपौत्त्रदौहित्राः। मातामहप्रमातामहवृद्धप्रमातामहाः। तत्पुत्त्रपौत्त्रप्रपौत्त्राश्च। इति दायभागः॥ * ॥ अथ सपिण्डादिविचारः। मत्स्यपुराणम्।
"लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम्॥"
नन्वेवं भ्रात्रादिभिः सह पिण्डतल्लेपभोक्तृत्वासम्भवात् कथं सपिण्डत्वमिति चेदुच्यते। तेषामपि पिण्डलेपयोः सम्बन्धोऽस्ति। तथा च बौधायनः। प्रपितामहः पितामहः पिता स्वयं सोदर्य्यभ्रातरः। सवर्णायाः पुत्त्रः पौत्त्रः प्रपौत्त्रो